नवमः पाठः ९

# आदर्शविद्यालयः

( षष्ठी विभक्तिः, दीर्घसन्धिः )



एषः अस्माकं विद्यालयः।
अस्माकं विद्यालयः आदर्शविद्यालयः अस्ति।
विद्यालयस्य भवनं सुन्दरं विस्तृतं च अस्ति।
एतस्य भित्तिषु सूक्तयः लिखिताः सन्ति।



एषः विद्यालयस्य सभागारः।
सभागारस्य अन्तः वयम् ईशवन्दनां कुर्मः।
योगासनम् अपि कुर्मः ।
अत्र एव उत्सवानाम् आयोजनं भवति।



वयं षष्ठीकक्षायाः छात्राः।
एषः अस्माकं कक्षाप्रकोष्ठः। अत्र वयं पठामः।
अस्माकं शिक्षकाः सम्यक् पाठयन्ति।
शिक्षकाः अस्माकं ज्ञानं वर्धयन्ति।
वयं तेषां सम्मानं कुर्मः।



एषः पुस्तकालयः।
अत्र वयं पुस्तकानाम् अध्ययनं कुर्मः।
अत्र बहूनि पुस्तकानि सन्ति।



एषा प्रयोगशाला।
विज्ञानस्य कालांशे वयम् अत्र आगच्छामः।
अत्र प्रयोगाणां माध्यमेन विज्ञानविषयम् अवगच्छामः।



एतत् क्रीडाङ्गणम्।
क्रीडायाः कालांशे वयम् अत्र क्रीडामः।
अत्र अनेकाः क्रीडाः भवन्ति, यथा - पादकन्दुकक्रीडा, यष्टिक्रीडा, कबड्डीक्रीडा इत्यादयः ।
क्रीडानां द्वारा वयं स्वस्थाः भवामः।

एषः सङ्गणक-प्रकोष्ठः।
अत्र वयं सङ्गणकयन्त्राणि चालयामः, टङ्कणस्य अभ्यासम् अपि कुर्मः।





एतत् विद्यालयस्य उद्यानम्।
•अत्र वृक्षाः पादपाः च सन्ति, यथा-निम्बः, बिल्वः, अश्वत्थः, तुलसी इत्यादयः। अत्र बहूनि पुष्पाणि विकसन्ति, यथा-पाटलम्, मालती इत्यादीनि।
यदा वर्षाकालः भवति, तदा अत्र वृक्षाणां रोपणं भवति।

ते शौचालयाः।
बालकानां बालिकानां च शौचालयाः पृथक् सन्ति।



विद्यालयस्य मध्ये जलमन्दिरम् अस्ति। तत्र वयं जलं पिबामः। विद्यालयस्य स्वच्छता प्रतिदिनं भवति ।अतः अस्माकं विद्यालयः स्वच्छः सुन्दरः च अस्ति । एषः अस्माकं प्रियः विद्यालयः अस्ति ।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| एषः | अयम् | यह |
| अस्माकम् | अस्मदीयः | हमारा |
| सभागारः | समारोहभवनम् | विशाल कक्ष (कमरा) |
| अन्तः | अन्तर्भागम् | अन्दर |
| प्रकोष्ठः | कक्षः | कक्ष |
| सम्यक् | उत्तमम् | अच्छी तरह से |
| बहूनि | अनेकानि | बहुत सारी |
| अवगच्छामः | जानीमः | जानकारी प्राप्त करते हैं। |
| क्रीडाङ्गणम् | खेलप्राङ्गणम् | खेल का मैदान |
| पादकन्दुकक्रीडा | क्रीडाविशेषः | फुटबाल |
| यष्टिक्रीडा | क्रीडाविशेषः | हॉकी |
| सङ्गणकम् | कम्प्यूटरयन्त्रम् | कम्प्यूटर |
| निम्बः | निम्बवृक्षः | नीम |
| बिल्वः | बिल्ववृक्षः | बेल (बिल्व) का पेड़ |
| अश्वत्थः | पिप्पलवृक्षः | पीपल वृक्ष |
| पाटलम् | पाटलपुष्पम् | गुलाब |
| मालती | मालतीपुष्पम् | चमेली |
| भित्तिषु | भित्तिकासु | दीवारों पर |
| वर्धयन्ति | वर्धनं कुर्वन्ति | बढ़ाते हैं। |

## अभ्यासः

१. उच्चारणं कुरुत-

| | | | |
|---|---|---|---|
| अस्माकम् | आदर्शविद्यालयः | विस्तृतम् | कुर्मः |
| षष्ठीकक्षायाः | प्रकोष्ठः | अध्ययनम् | अवगच्छामः |
| क्रीडाङ्गणम् | यष्टिक्रीडा | टङ्कणस्य | अभ्यासम् |

## २. एकपदेन उत्तरत -

(क) सभागारस्य अन्तः केषाम् आयोजनं भवति ?

(ख) पुस्तकालये वयं केषाम् अध्ययनं कुर्मः ?

(ग) सङ्गणकप्रकोष्ठे वयं कस्य अभ्यासं कुर्मः ?

(घ) विद्यालयस्य मध्ये किम् अस्ति ?

(ङ) के अस्माकं ज्ञानं वर्धयन्ति ?

## ३. एकवाक्येन उत्तरत-

(क) विद्यालयस्य भवनं कीदृशम् अस्ति ?

(ख) सभागारे केषाम् आयोजनं भवति ?

(ग) केषां माध्यमेन विज्ञानविषयम् अवगच्छामः ?

(घ) वृक्षाणां रोपणं कदा भवति ?

(ङ) विद्यालयस्य मध्ये किम् अस्ति ?

## ४. अधोलिखितानां पदानां सन्धिं कुरुत-

**यथा** - **विद्या + आलयः** = विद्यालयः

(क) पुस्तक +आलयः = ..................

(ख) सभा + आगारः = ..................

(ग) क्रीडा + अङ्गणम् = ..................

(घ) परि + ईक्षा = ..................

(ङ) सु + उक्तयः = ..................

५. अधोलिखितानां पदानां वचनपरिवर्तनं कुरुत –

| | एकवचनम् | | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| यथा – | **विद्यालयस्य** | = | **विद्यालययोः** | **विद्यालयानाम्** |
| (क) | उत्सवस्य | = | ........................ | ........................ |
| (ख) | शिक्षकस्य | = | ........................ | ........................ |
| (ग) | पादपस्य | = | ........................ | ........................ |
| (घ) | मम | = | ........................ | ........................ |
| (ङ) | वृक्षस्य | = | ........................ | ........................ |

६. परस्परं सुमेलयत –

| | स्थानम् | कार्यम् |
|---|---|---|
| यथा – | क्रीडाङ्गणम् | ईशवन्दना |
| (क) | पुस्तकालयः | टङ्कणस्य अभ्यासः |
| (ख) | जलमन्दिरम् | विज्ञानस्य प्रयोगाः |
| (ग) | सभागारः | क्रीडा |
| (घ) | प्रयोगशाला | पुस्तकानाम् अध्ययनम् |
| (ङ) | सङ्गणकप्रकोष्ठः | जलस्य पानम् |

७. अधोलिखितानां पदानां प्रयोगं कृत्वा वाक्यानि रचयत –

| | | | |
|---|---|---|---|
| यथा – | **आदर्शः** | – | **एषः आदर्शः विद्यालयः अस्ति ।** |
| (क) | सङ्गणकम् | – | ............................................ । |
| (ख) | वयम् | – | ............................................ । |
| (ग) | पादपाः | – | ............................................ । |
| (घ) | सम्यक् | – | ............................................ । |
| (ङ) | योगासनस्य | – | ............................................ । |

**८. रेखाङ्कितपदस्य स्थाने उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत -**

(क) अनिल: विद्यालयं गच्छति ।

(ख) छात्रा पुस्तकं पठति।

(ग) विद्यालयस्य सभागार: अस्ति ।

(घ) छात्रा: शिक्षकाणां सम्मानं कुर्वन्ति ।

(ङ) अध्यापिकाया: पुस्तकम् अस्ति।

**९. प्रदत्तशब्दानां षष्ठीविभक्ते: रूपाणि लिखत -**

| | शब्द: | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा - | बालक | - | बालकस्य | बालकयो: | बालकानाम् |
| | पर्वत | - | पर्वतस्य | ................ | ................ |
| | अध्यापक | - | ................ | ................ | अध्यापकानाम् |
| | विद्यालय | - | ................ | विद्यालययो: | ................ |
| | बालिका | - | बालिकाया: | बालिकयो: | बालिकानाम् |
| | लता | - | लताया: | ................ | ................ |
| | अजा | - | ................ | अजयो: | ................ |
| | क्रीडा | - | ................ | ................ | क्रीडानाम् |
| | फल | - | फलस्य | फलयो: | फलानाम् |
| | व्यजन | - | व्यजनस्य | ................ | ................ |
| | उद्यानम् | - | ................ | उद्यानयो: | ................ |
| | पुस्तक | - | ................ | ................ | पुस्तकानाम् |

## योग्यता-विस्तार:

**१. ध्यानेन पश्यत, पठत अवगच्छत च-**


शिव:


गणेश:


सीता


राम:

शिवस्य पुत्र: गणेश: ।

शिव: - शिवस्य

सीताया: पति: राम: ।

सीता - सीताया:


रामायणम्


वाल्मीकिः

एषः षष्ठीविभक्तेः प्रयोगः। सम्बन्धस्य प्रकटनाय षष्ठीविभक्तेः प्रयोगः भवति। उपरितन-वाक्येषु षष्ठीविभक्तेः एकवचन-रूपाणां प्रयोगः अस्ति। अनेन एव प्रकारेण द्विवचने बहुवचने च अपि प्रयोगः भवति।

रामायणस्य लेखकः वाल्मीकिः।

रामायणम् - रामायणस्य

## २. सर्वनामशब्दानां षष्ठी विभक्तेः प्रयोगान् पठत अवगच्छत च -

| | | | | |
|---|---|---|---|---|
| **तत्** | पुँल्लिङ्गम् | तस्य | तयोः | तेषाम् |
| | स्त्रीलिङ्गम् | तस्याः | तयोः | तासाम् |
| | नपुंसकलिङ्गम् | तस्य | तयोः | तेषाम् |
| **एतत्** | पुँल्लिङ्गम् | एतस्य | एतयोः | एतेषाम् |
| | स्त्रीलिङ्गम् | एतस्याः | एतयोः | एतासाम् |
| | नपुंसकलिङ्गम् | एतस्य | एतयोः | एतेषाम् |
| **किम्** | पुँल्लिङ्गम् | कस्य | कयोः | केषाम् |
| | स्त्रीलिङ्गम् | कस्याः | कयोः | कासाम् |
| | नपुंसकलिङ्गम् | कस्य | कयोः | केषाम् |
| **अस्मद्** | | मम | आवयोः | अस्माकम् |
| **युष्मद्** | | तव | युवयोः | युष्माकम् |

## ३. अस्मिन् पाठे युष्माभिः केचन विशेषशब्दाः पठिताः।

**यथा**- विद्यालयः, सभागारः, योगासनम्, सूक्तयः, पुस्तकालयः इत्यादयः।

एतेषु शब्देषु शब्दद्वयस्य मेलनं कृतम् अस्ति।

**यथा**- विद्यालयः = विद्या + आलयः

सभागारः = सभा + आगारः

अत्र प्रथमशब्दस्य अन्तिमवर्णेन सह द्वितीयशब्दस्य प्रथमवर्णस्य मेलनं कृतम् अस्ति, पश्यत–

विद्या +आलयः

विद्य् आ + आलयः

विद्य् आ लयः = विद्यालयः (विद्यालयः)

सन्धेः त्रयः भेदाः सन्ति–
1. स्वर–सन्धिः
2. व्यञ्जन–सन्धिः
3. विसर्ग–सन्धि

वर्णानां मेलनस्य एषा प्रक्रिया सन्धिः कथ्यते।

यत्र समानानां ह्रस्वदीर्घस्वराणां मेलनेन दीर्घस्वरः भवति, तत्र दीर्घसन्धिः भवति।

यत्र स्वरवर्णयोः मेलनं भवति, तत्र स्वरसन्धिः भवति।
स्वरसन्धेः पञ्चभेदाः भवन्ति। तेषु एकः भेदः दीर्घसन्धिः अस्ति।

### –दीर्घसन्धेः सामान्यनियमः अनेन प्रकारेण अस्ति –

अ/आ + अ/आ = आ

| | | |
|---|---|---|
| पुस्तक + आलयः | = | पुस्तकालयः |
| देव + आलयः | = | देवालयः |
| मुर + अरिः | = | मुरारिः |
| योग + आसनम् | = | योगासनम् |

इ/ई + इ/ई = ई

| | | |
|---|---|---|
| परि + ईक्षा | = | परीक्षा |
| हरि + ईशः | = | हरीशः |
| अति + इव | = | अतीव |
| रजनी + ईशः | = | रजनीशः |

उ/ऊ + उ/ऊ = ऊ

| | | |
|---|---|---|
| सु + उक्तयः | = | सूक्तयः |
| भानु + उदयः | = | भानूदयः |
| वधू + उत्सवः | = | वधूत्सवः |
| गुरु + उपदेशः | = | गुरूपदेशः |

ऋ/ॠ + ऋ/ॠ = ॠ

| | | |
|---|---|---|
| पितृ + ऋणम् | = | पितॄणम् |
| होतृ + ऋकारः | = | होतॄकारः |

**अध्यापकाय निर्देशः –**

। एतादृशानि अन्यानि अपि उदाहरणानि स्वपाठ्यपुस्तके पश्यत।

। अध्यापकः छात्रैः दीर्घसन्धेः अन्यान्यशब्दानाम् अत्र विशेषरूपेण सन्धिप्रकियां विच्छेदप्रक्रियां च बोधयेत्।